नं॰ ४८६७

नाम- आकाशभैरवतंत्रकल्पे शरभ कवचम्

कर्ता - x

पत्र संख्या - ७ पत्राणि - सं॰ १८४८

विषयः - तंत्रम्

✓

© Dharmartha Trust J&K. Digitized by eGangotri

घ्रान्सकवचम् ख्राकापा भैरवकल्पे

५८६७

© Dharmartha Trust J&K. Digitized by eGangotri

सार्पकवच पत्रे ८

© Dharmartha Trust J&K. Digitized by eGangotri

त्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शरभाष्टकस्तोत्रं नामाध्यायः ॥ समाप्तः ॥ श्रीरस्तु ॥
श्रीगणेशायनमः ॥ ईश्वरउवाच ॥ वक्ष्यामि शृणु देवेशि सर्वरक्षणमद्भुतं ॥ शरभंकवचं नाम्ना
चतुर्वर्गफलप्रदं ॥ १ ॥ शरभसालुवपक्षिराजाख्यं कवचस्य तु ॥ सदाशिव ऋषिश्छंदोबृहती प
रमेश्वरः ॥ २ ॥ देवता प्रणवो बीजं प्रकृतिः शक्तिरुच्यते ॥ कीलकं पक्षिराजेति सर्वरक्षाकरो वि
भुः ॥ ३ ॥ परप्रयोगशांत्यर्थे सर्वशत्रुनिवारणे ॥ चतुर्वर्गार्थसिद्ध्यर्थे विनियोगोथ भावना ॥
४ ॥ रत्नाभं सुप्रसन्नं त्रिनयनममृतोन्मत्तभाषाभिरामं कारुण्यांभोधिमीशं वरदमभयदं चंद्र
रेखावतंसं ॥ शंखाध्मातारिलोकाप्रतिहतविधिना भासमानात्मभासं सर्वेशं सालुवेशं प्रणत
भयहरं पक्षिराजं नमामि ॥ इति ध्यानं ॥ ॥ श्रीशिवः पुरतः पातु मायाबीजस्तु पृष्ठतः ॥ पिनाकी दक्षि	१
णं पातु वामपार्श्वं महेश्वरः ॥ ५ ॥ शिखायां पातु मे शंभुर्निटिलं पातु शंकरः ॥ ईश्वरो वदनं पातु भ्रुवोर्मध्यं
पुरांतकः ॥ ६ ॥ कवौ पातु ममस्थाणुः कपर्दी पातु लोचने ॥ शिवो मे श्रोत्रयोः पातु वागीशः पातु सं

© Dharmartha Trust J&K. Digitized by eGangotri

त्रिकां ॥७॥ नासयोर्मे वृषारूढो नासाग्रं वृषभध्वजः ॥ स्मरारिः पातु मे ताल्वोरोष्ठयोर्भक्तव
त्सलः ॥८॥ पातु मृत्युंजयो दंतांश्चिबुकं पातु मन्तराड् ॥ परमेशः कपोलौ मे त्रिकं पातु कपाल
भृत् ॥९॥ कंठं पशुपतिः पातु स्थलीं पातु हनूमम ॥ स्कंधद्वयं हरः पातु धूर्जटिः पातु मे भुजौ ॥
१०॥ भुजसंधिं महादेव ईशानो मे प्रकूर्परं ॥ मध्यसंधिं जगन्नाथः प्रकोष्ठं चंद्रशेखरः ॥११॥
मणिबंधं त्रिनेत्रो मे भीमः पातु करस्थले ॥ करपृष्ठं मृडः पातु रुद्रोंगुष्ठद्वयं मम ॥१२॥ उमा
सहायस्तर्जन्यौ भर्गो मे पातु मध्यमे ॥ अनामिके करालास्यः कालकंठः कनिष्ठिके ॥१३॥ ग
गाधरोंगुलीपर्वाण्यप्रमेयो नखानि मे ॥ भालं तत्पुरुषः कक्षोरक्षेद्यज्ञाध्वरांतकः ॥१४॥ अ
घोरो हृदयं पातु वामदेवस्तनद्वयं ॥ भालभृज्जठरं पातु नाभिं नारायणोव्ययः ॥१५॥ गुह्यं
प्रजाकरः पातु कुक्षि पार्श्वौ महाबलः ॥ सद्योजातः कटिं पातु पृष्ठभागं तु भैरवः ॥१६॥ मोहनोज
घनं पातु गुदं मम जितेंद्रियः ॥ ऊर्ध्वरेता लिंगदेशं वृषणौ वृषभध्वजः ॥१७॥ ऊरुयुग्मं भवः

© Dharmartha Trust J&K. Digitized by eGangotri

पातुजानुद्युग्मंभवांतकः॥ॐकारःपातुमेजंघेफट्कारोममगुल्फके॥१८॥फट्कारःपादपृ
ष्ठेमेवषट्कारोंघ्रिणोस्तले॥स्वाहाकारोंगुलीपार्श्वेस्वधाकारोंगुलिर्मम॥१९॥त्वरितःसन्धिबं
धोमेरोमकूपंनृसिंहजित्॥त्वचंपातुमनोवेगःकालजिद्रुधिरंमम॥२०॥पुष्टिदःपातुमेमां
संमेदोमेस्वस्तिदोवतु॥सर्वात्मास्थित्वचंपातुमज्जांममजगत्प्रभुः॥२१॥शुक्रंवह्निकरःपा
तुवह्निंवाचामधीश्वरः॥मूलाधारांबुजंपातुभगवान्शरभेश्वरः॥२२॥स्वाधिष्ठानमजःपा
तुमणिपूरमजप्रियः॥अनाहतंसदापातुवेशोविशुद्धिंजीवनायकः॥२३॥सर्वज्ञानप्रदोदेवो
ललाटंमेसदाशिवः॥ब्रह्मरंध्रंमहादेवःपक्षिराजोखिलात्मवान्॥२४॥सर्वलोकवशीका
रःपातुमांपरगर्वजित्॥वज्रमुष्टिवराभीतिहस्तःकालाभ्रसंनिभः॥२५॥विजयासहितं २
पातुचैंद्रींककुभमग्निजित्॥वाकिशूलकंपाशासिहस्तःसौदामिनिप्रभः॥२६॥जयायुतोम
हाभीमभीमःपातुवैश्वानरींदिशं॥दंष्ट्रासिमुसलंशूलंपाशांकुशकरांबुजः॥२७॥यमांतिको

© Dharmartha Trust J&K. Digitized by eGangotri

जितासुक्तोयामींपात्वनिशं दिशं॥खड्गखेटाग्नेपरशुहस्तःशत्रुविमर्दनः॥२८॥अपरा
जितयामुक्तःसदाव्यान्नैरृतीं दिशं॥पाशांकुशधनुर्बाणपाणिश्रेणियुवाग्रगः॥२९॥
दरिद्रामोनिशंपायाद्वारुणींदिशमात्मजित्॥ध्वजाग्रकवचोदारभुजोदुर्गायुतःखगः॥३०॥
चंडवेगःशिवःपायात्सततंमारुतींदिशं॥गदाक्षस्त्रवराभीतिकरांभोजःशिवायुतः॥३१॥
कनकांभोमहातेजाःपायात्कौबेरकींदिशं॥त्रिशूलाहिकपालाग्निःदोस्थलोविद्ययायुतः॥
॥३२॥भस्मोद्धूलितसर्वांगोदिशंपात्वपराजितां॥जपास्त्रकुपुस्तकांभोजकमंडलुकरान्वि
तः॥३३॥ऊर्ध्वंपातुगिरायुक्तःसर्वभूतहितेरतः॥शंखचक्रगदाभीतिहस्तःपद्मायु
तोव्ययः॥३४॥नीलांजनसमोनीलःपातालंपात्वनारतं॥अनुक्तविदिशःपातुसालुवो
नरसिंहजित्॥३५॥शरभःपातुसंग्रामेयुद्धेवैरिकुलांतकः॥सर्वसौभाग्यदःपातुजाग्रत्स्व
प्नसुषुप्तिषु॥३६॥सर्वसंपत्प्रदःपातुधनधान्यादिकंमम॥संतानदःसुतान्पातुपुत्राना

© Dharmartha Trust J&K. Digitized by eGangotri

युक्षरोनित्यं ।। ३७ ।। बंधून्वृद्धिकरः पातु गृहं मम वशंकरः ।। ग्रामं ग्रामेश्वरः पातु राज्यं पातु दि
गंबरः ।। ३८ ।। राष्ट्रं शांतिकरः पातु धर्मकर्माणि भैरवः ।। बटुकः पातु मे सर्वमवस्थात्रितयेषु च ।
।३९। स्पर्शवीक्षणसंश्लिष्टः प्राणरक्षां मनोभवः ।। प्रधानमूर्तिभावश्च प्रसादेश्वासुमुद्दिक
त् ।। ४० ।। साधकः प्रणवं तारं नमो भगवते तिच ।। प्रहिनाम चतुर्थ्यंतं स्पर्शोमि भंत्यभिधीयते ।
।४१। द्विर्ज्वलप्रज्वलेत्साध्यं साधयद्विद्विरक्षतत् ।। सर्वभूतेभ्यो हुं फट् स्वाहांतं यतद्विहेक्षणं ।।
४२ ।। स्पृष्टे वान्यपश्यन्नपंकुलापातिस्थानं समाहितः ।। प्रार्थयेदखिलं मंत्रे पूर्व्वहृद्दिस्थं साक्षुवेश्वरं ।
।४३। ये ग्रामयातनाः क्रूराः कपटादौ एकाभटं ।। तस्कराः शत्रवः क्षुद्रा बंधुसक्ताः पलाशनाः ।।
४४ ।। छद्मचाराविटाभ्रष्टा दिवाचरनिशाचराः ।। ते सर्वे पक्षिराजस्य पक्षवातपराहताः ।। ४५ ।। ३
स्त्रीबालसहिताः क्षिप्रं पितृमातृकुलान्विताः ।। नग्नचित्ता हलस्थाना यातु देशांतरं स्वयं ।४६।
ये च दुष्टग्रहा रक्षः पिशाचा देवयोनयः ।। चतुःषष्टिगणाश्चैव सप्तत्युन्मादकाग्रहाः ।। ४७ ।।

© Dharmartha Trust J&K. Digitized by eGangotri

=अष्टाशीतिर्महाभूताः सप्तकोटिमहाग्रहाः ॥ नवतिज्वरभेदाश्च शतभेदाश्च रूत्तिकाः ॥ ४८ ॥
पंचाशद्गणनाथाश्च नियुतं कृत्रिमग्रहाः ॥ प्रेतारूढाः स्त्रयः स्त्रिंशत्पिंडदानपरायणाः ॥ ४९ ॥
=अयुतं क्षुद्रभेदाश्च चत्वारिंशच्छिबाह्वयोः ॥ द्वात्रिंशद्ङ्किवक्राश्च विशन्माजरिकग्रहाः ॥ ५० ॥ च
तुरशत्यारखुरूपाश्च ये चान्ये देवयोनयः ॥ ते सर्वे सानुवेशस्य शंरवनिस्वनमोहिताः ॥ ५१ ॥
विषघ्याः स्खलिताः स्वांताः प्राणत्राणपरायणाः ॥ गच्छंतु सभयोत्कारो देशांतरमनिच्छया ॥ ५२ ॥
ये चान्ये वनजा ग्राम्याः श्वुनकोरगवृश्चिकाः ॥ =प्राशीविषशिवाव्यालाव्याघ्रा=ऋक्षेभ
सूकराः ॥ ५३ ॥ गृध्राश्येनाः खगांकाकादंशकामशकामृगाः ॥ एतेशर भहस्ताग्र नखोत्कर वि
मोहिताः ॥ ५४ ॥ स्त्रवद्रक्तच्छरासक्ताः शिलातलनिताडिताः ॥ संभेदनवशाः शीघ्रं नश्यंत्व खिल
दुश्चराः ॥ ५५ ॥ नदंशानुरगाः क्वापिनातिवातोपिवीजतु ॥ नदहत्वसहोवह्निरापांत्वापोनचाधि
कं ॥ ५६ ॥ नवर्षत्वतिवृष्टिश्च नपतत्वशनिः क्वचित् ॥ नाकमत्यपमृत्युश्चस्तत्यातंकः कदाच

© Dharmartha Trust J&K. Digitized by eGangotri

ना॥५७॥ नस्त्रियंत्वंभसिजमानभवत्यशुभंक्वचित्॥ नवेदंत्वसहंवयंजंतवोममदेशाके॥५८॥
नस्यात्तुवैरजंत्नांमन्योन्यंराज्यकेमम॥ भवंतुसुखिनःसर्वेसर्वाःसंतुपतिव्रताः॥५९॥ स
र्वाश्चयंतुसत्पुत्रान्पुत्रीश्चशुभलक्षणाः॥ सर्वेसर्वाश्चनंदंतुसंतुकल्याणकारकाः॥६०॥ रा
जन्वतीमहीचास्तुराजाभवतुधार्मिकः॥ संस्त्रवंतुपयोगावःफलंत्योषधयोधिकं॥६१॥ फ
लंतुफलदावृक्षाःसम्यक्भवतुमेखिलं॥ कामक्रोधमहालोभसंमोहमदमत्सरं॥६२॥ सात्क
मेकापिसर्वेशाभगवन्करुणानिधे॥ शरभेश्वरविश्वेशापाक्षिराजदयानिधे॥६३॥ देहिमेह्यव
लांभक्तिंत्वपन्नोस्मिपुनःपुनः॥ गौरीवक्त्रभकामारिकालकूटविषादन॥६४॥ मामुद्धरपदांबोधे
त्रिपुरंध्रांतकांतकः॥ सालुवेशजगन्नाथसर्वभूतहितेरत॥६५॥ पाहिमांनरसाद्दुष्टांश्चोरान्नाशा ६
यनाशाय॥ कालभैरवविश्वेशाविश्वरक्षापरायणः॥६६॥ रक्षमत्पकचौरेभ्योध्यानराशिमिमंवि
भो॥ पक्षिराजमहादेवघ्रणनात्रिविनाशन॥६७॥ महीयानिपदार्थानिनित्यंपालयपालय॥ स

© Dharmartha Trust J&K. Digitized by eGangotri

र्वन्तःसर्वलोकेचासर्वदुष्टविनाशनः॥६८॥तस्करेणाहृतंवस्तुडुवंदापयदापय॥येमर्मवादिनः
क्षुद्राःक्षुद्रोपद्रवकारकाः॥६९॥सर्वाचारपरित्यक्तामानहीनाश्चरोधकाः॥तेसर्वेसा
न्तुवेशस्यमुसलायुधचूर्णिताः॥७०॥नश्यंतुनिमिषार्द्धेनपावकावृततूलवत्॥येज
नाद्रोहिणोन्याशास्त्वनालोचितभाषिणः॥७१॥सत्कर्मविघ्नकर्त्तारोशुंतामत्सारिणोनराः॥
तेसान्तुवेशहस्ताग्रखड्गनिर्भिन्नदेहिनः॥७२॥पतंतुभ्रतुलेयाम्येप्राणास्तेषांव्रयांत्वरं॥त्व
दंघ्रिध्याननिर्दग्धपापकोशापमंत्रिणः॥७३॥मद्यंडुह्यानियेतेषांविभवानिक्षयंत्वरं॥त्व
दाचारपरंभक्तंसाधकंमांविवेकिनं॥७४॥येचाक्रमंतिसंग्रामेतेगच्छंतुपराहताः॥त्वदीये
नैवमार्गेणसंचरंतंजपातुरं॥७५॥येवदंतिपरीवादंभ्रांताःशीघ्रंभवंतुते॥त्वदासमम
लीधीरंयेमांतर्जयितुंबलात्॥७६॥मनसाप्यनुमन्यंतेतत्क्षांतंक्षमयुक्षणात्॥मनसाक
र्मणावाचायच्छंत्यतिदुःसहं॥७७॥तेमहारोगशोकाब्धौपतंत्वाशुशिवाज्ञया॥मदीया

© Dharmartha Trust J&K. Digitized by eGangotri

निपदार्थांनिग्रहीतुंयोवलोकवे॥७८॥तत्क्षणादेवनष्टाश्चोभवत्याम्भुशिवाज्ञया॥मदीयं
द्रव्यमादाययेगच्छंतीहतस्करा:॥७९॥सिंहारिपाशसंबद्धास्तेगच्छंतुप्रदक्षिणं॥सीमातो
ताम्बमेचोरागृहीतद्रव्यसंचय:॥८०॥=प्रवेशावयवास्तेनास्त=आगच्छंतुसानुगा:॥तस्क
5 रानिस्तगातीता:स्वोतधान्यधनादिका:॥८१॥पक्षिराजांकुशाकृष्टा:समागच्छंतुसानुगा:॥
चोराग्रहीतुमद्युक्ता:समानपरिशीलिन:॥८२॥समाहृतपदार्थाढ्यास्त=आगच्छंतुसानुगा:॥
शारभेशोहृताकृष्टास्त=आगच्छंतुमद्गृहे॥८३॥तेसाधुवेशपक्षोत्थवातेगच्छंतुसत्वरं॥शां
तंविवेकिनंभक्तंत्वदंघ्रिध्यानतत्परं॥८४॥श्रुवंतियेसहप्राणास्तेषांपातुयमांपुरीं॥
षट्त्रिंशत्कोष्ठकेमंत्रेरेखास्वायसाध्यके॥८५॥स्वेष्टामंत्रेलिखित्वातुजपेदाध्यसाधक:॥ ५
उदङ्मुख:सहस्रंतुरक्षणायजपेन्निशि॥८६॥नष्टाहरणकेपंचरात्रंपश्चिमादिङ्मुख:॥मा
रणेसप्तरात्रंतुदक्षिणाभिमुखोजपेत्॥८७॥रोगनिग्रहणेचाष्टरात्रमाग्नेयदिङ्मुख:॥इ

© Dharmartha Trust J&K. Digitized by eGangotri

तिगुह्यं परमं मंत्रं परमं सर्वसिद्धिदं ॥८८॥ शारभेशाख्यकवचं चतुर्वर्गफलप्रदं ॥ प्रत्यहं प्र
तिपक्षं वा प्रतिमासमथापि वा ॥८९॥ योजपेत्प्रतिवर्षं वा वरेण्यः स शिवो भवेत् ॥ एवं हि
जपतः पुंसः पातकं चोपपातकं ॥९०॥ सर्वं विलयमाप्नोति रविणा तिमिरं यथा ॥ दशावृत्तं
6 योजपेन्नित्यं प्रातरुत्थाय साधकः ॥९१॥ सर्वां सिद्धिं समाश्रित्य देहांते स शिवो भवेत् ॥ त्रि
कालं ध्यानपूर्वं तु जपेद्द्वादशवार्षिकं ॥९२॥ कायेनानेन देवेशि जीवन्मुक्तो भवेत्पुसः ॥ शत
वारं जपेन्नित्यं मंडलं यो वरानने ॥९३॥ सोणिमादिगुणान्प्राप्य विचरेत्स्वेच्छया सदा ॥ =अत
लादिधरण्यादिभुवनानि चतुर्दश ॥९४॥ विचरेत्कामतः सर्वैः पूज्यमानो यथा सुरः ॥ त्रिमा
से योजपेन्नित्यमष्टोत्तरसहस्रकं ॥९५॥ सहसाशारभेशस्य सारूप्यं लभतेंबिके ॥ षण्मासं
योजपेदेवं प्रयतस्तु दृढव्रतः ॥९६॥ मद्रूपधारकैर्मर्त्यैः सह सिद्धिप्रदायकः ॥ मम लोके
स संपूज्यो विष्णुलोके तथैव च ॥९७॥ ब्रह्मलोके चरमते सर्वत्र न निवार्यते ॥ इंद्राग्नियमरक्षोना

© Dharmartha Trust J&K. Digitized by eGangotri

6 जलेशः पवनैः सह ॥१९८॥ सोमेशानेकलक्ष्मीशैर्दिशांपालैश्च पूज्यते ॥ आदित्यसोमभौमाज
बुधश्रीगुरुभार्गवैः ॥१९९॥ पूज्यते सग्रहैः सर्वैः शनिराहुः सकेतुभिः ॥ कृत्तंगिरपुनस्त्यै
चपुष्यहस्तात्रिमरीचिभिः ॥२००॥ दक्षकश्यपमन्वाद्यैर्योगिनाभिः सपूज्यते ॥ भैरवैर्वसुभीरुद्रै
रादित्यैर्वालखिल्यकैः ॥२०१॥ दिग्गजैश्च महानागैर्दिव्यास्त्रैर्दिव्यवाहनैः ॥ महेश्वरैर्महारत्नैः
कामधेनुसुरद्रुमैः ॥२०२॥ सरिद्भिः सागरैः शैलैर्देवताभिस्तपोधनैः ॥ दानवै राक्षसैः क्रूरैः सि
द्धगंधर्वकिंनरैः ॥२०३॥ यक्षै विद्याधरैर्नागैरप्सरोभिः सपूज्यते ॥ अपस्मारग्रहैर्भूतैरुन्मा
तैर्ब्रह्मराक्षसैः ॥२०४॥ वेतालैः खचरैर्मर्त्यैः कुष्मांडैराक्षसग्रहैः ॥ ज्वालावक्त्रैस्तमोहानैः स्त्रीग्र
हैः पापविग्रहैः ॥२०५॥ मृतजातपिशाचाद्यैर्ग्रहैः सर्वैः सपूज्यते ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शू ६
द्रैरन्यैश्चजातिभिः ॥२०६॥ पशुपक्षिमृगव्यालैः पूज्यते सर्वजंतुभिः ॥ किमत्र बहुनोक्तेन त
व वक्ष्ये यथातथं ॥२०७॥ मयाच विष्णुनाचैव विश्वकर्त्रा त्वयात्मने ॥ भगवत्यां गिरालक्ष्म्या ब्र

© Dharmartha Trust J&K. Digitized by eGangotri

द्य

माण्या ष्टमाष्टभिः॥१०८॥गणेश्वरादियोगीन्द्रैर्योगिनीभिः सपाल्यते॥यइदं प्रजपेन्नित्यं नासाध्यं तस्य विद्यते॥१०९॥कवचेन्द्रं महामंत्रं जपेदस्मादनुत्तमं॥उच्चाटने मरुदंको विद्वेषे राक्षसानरनः॥११०॥नागाननो निवृत्तौ तु सर्वे शौवाल दिङ्मुखः॥यइदं प्रजपेन्नित्यं त्रिकालं ध्यानपूर्वकं॥१११॥सर्वसिद्धिमवाप्नोति सहस्राख्याधिकोत्तमः॥देवदेव महादेव शिवकारुण्यवारिधे॥११२॥पाहि मां प्रणतं स्वामिन्प्रसीद सततं मम॥यत्कृत्यं तन्न कृतं यदकृत्यं कृत्यवत्तदाचरितं॥उभयोः प्रायश्चित्तं शिव तव नामाक्षरद्वयोच्चरितं॥११३॥ ॥इत्याकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शरभकवचं नाम एकोनचत्वारिंशोध्यायः॥ ॥समाप्तः॥संवत् १८४८ वर्षे पौष शुक्ले १० भौमवासरे॥श्रि॰जयशंकर विद्य॰श्रि॰सविनादत्त पठनार्थं॥लिखितं श्रि॰प्रभुदत्त रेवाशंकस्वयं वाराणस्यां॥लेखक पाठकयोः शुभं भवतु॥ ॥कल्याणमस्तु॥तैलाद्रक्षेज्जलाद्रक्षेत् रक्षेत्शिथलबंधनात्॥इत्यादि

© Dharmartha Trust J&K. Digitized by eGangotri

७

© Dharmartha Trust J&K. Digitized by eGangotri